वाच्यम् अत्र विशुद्धय इत्यभिधानेनाधोधृतवस्त्रस्यैव स्नात्रेण प्रक्षालनं नतूत्तरीयस्य एतदर्थमेकवचनम् । अतएव "स्नात्वैवाधरीयवस्त्र" प्रक्षाल्यं वशिष्ठवचनैकवाक्यतया । इत्याह्निकचिन्तामणिः । "स्नातो नाङ्गानि निर्मृज्यात् स्नानशाट्या न पाणिना" इति विष्णुपुराणीयेनाधरीयवस्त्रेणैव गात्रमार्जनं निषिध्यते । "एतेन निष्पीड्य स्नानवस्त्रमिति" कात्यायनवचने एकत्वमविवक्षितमिति निरस्तम् । अतएव सर्वत्रैकत्वं निर्दिष्टम् । शिष्टानाम् आचारोऽपि तथा इति । "नाजस्रमिति पुनः पुनः स्नाननिषेधः रागप्राप्तस्नानविषयो दृष्टार्थकत्वात् । एवञ्चैकस्मिन् दिने नानातीर्थादिनिमित्तप्राप्तस्नानावृत्तिर्भवत्येव वैधत्वात् । अत्रापि तन्त्रप्रसङ्गयोः सत्त्वे सकृदेवेति । अह्नः स्नानप्रधानकालमाह दक्षः "चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत् । तिलपुष्पकुशादीनि स्नानञ्चाकृत्रिमे जले"। विष्णुः "कुशाभावे कुशस्थाने काशं दूर्वां वा दद्यादिति विद्याकरधृतम् "तर्जनी रूप्यसंयुक्ता हेमयुक्ता त्वनामिका । सैव युक्ता तु दर्भेण कार्य्या विप्रेण सर्वदा" । मत्स्यसूक्ते "शक्ताः समूला दर्भाश्च गुच्छेन चाधिकं फलम् । सव्यः गोपुच्छः कार्य्यो दक्षिणः सपवित्रकः" इति रोगिणश्चाण्डालादिस्पर्शोऽपि न दोषायेत्याह रत्नाकरे बृहस्पतिः "तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे । नगरग्रामदाहे च स्पृष्टास्पृष्टि न दुष्यति । आपद्यपि च कष्टायां सद्भये पीडने सदा । मातापित्रोर्गुरोश्चैव निदेशे वर्त्तने तथा" । स्पृष्टास्पृष्टीत्यव्ययम् क्रियाव्यतिहारे । तथेति न दुष्यतीत्यर्थः । गारुडे "सर्वतीर्थाभिषेकाद्धि पवित्रं विदुषां वचः । धर्मश्रवणवेलायां विप्रो व्याससमः स्थितः" । तथाविधातुरं प्रति जाबालः "अशिरस्कं भवेत् स्नानं स्नानाशक्तौ तु कर्म्मिणाम् । आर्द्रेण वाससा वापि दैहिकं मार्जनं स्मृतम्" कर्म्मिणाम् "शिरःस्नातस्तु कुर्वीत दैवं पैत्रमथापि वा" इति मार्कण्डेयपुराणोक्तकर्म चिकीर्षूणां मार्जनमिह प्रोञ्छनं, योगियाज्ञवल्क्यः "असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया । मान्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः । मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च । वारुणं मानसञ्चैव सप्त स्नानं प्रकीर्त्तितम् । "आपो हिष्ठेति" वै मान्त्रं मृदालम्भस्तु पार्थिवम् । आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम् । यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते । वारुणञ्चावगाहश्च मानसं विष्णुचिन्तनम् । समस्तं स्नानमुद्दिष्टं मन्त्रस्नानक्रमेण तु । कालदोषादसामर्थ्यात् सर्वं तस्य फलं स्मृतम्" । आपो हिष्ठेति आपो हिष्ठादि ऋक्त्रयमत्र विवक्षितम् । एवञ्च "कालदोषादसामर्थ्यात् न शक्नोति यदाम्भसि । तदा स्नात्वा तु ऋषिभिर्मन्त्रैर्दृष्टन्तु मार्जनम् । यत्र आपस्तु१ द्रुपदा२ आपो हिष्ठा३ऽघमर्षणम्४ । एभिश्चतुर्भिः स्वगन्मन्त्रैर्मन्त्रस्नानमुदाहृतम् । इति योगियाज्ञवल्कीयं यन्मन्त्रस्नानान्तरं तत् प्राधान्यख्यापनाय । अतएव पितृदयितायां सन्ध्यातः पूर्वं तल्लिखितम् । मृदालम्भस्तु गङ्गामृत्तिकातिलकरूपः । भस्मना संस्कृतभस्मना इति छन्दोगाह्निकः । अवगाहन्त्र मन्त्राद्यङ्गशून्यावगाहनमात्रं विवक्षितम् अतो मुख्यावगाहनरूपस्नानानुकल्पत्वमप्युक्तम् । कालदोषोऽतिवृष्ट्यादिः असामर्थ्यं शरीरापाटवहेतुः अल्पत्वेन सम्पूर्णवारुणस्नानविधिकालायोग्यत्वं वेति । एतन्मूलकं "गेहे चेत्तदमन्त्रवदिति" छन्दोगपरिशिष्टीयं प्रागुक्तम् अन्यथा मूलभूतश्रुत्यन्तरकल्पनापत्तेः सामर्थ्ये तूद्धृतजलेनापि समन्त्रकस्नानमाह पराशरभाष्ये व्यासः "शीतास्त्वपो निषिच्योष्णा मन्त्रसम्भारसंस्कृताः । गेहेऽपि शस्यते स्नानं तद्धीनमफलं स्मृतम्" । पद्मपुराणम् "नैर्मल्यं भावशुद्धिश्च विना स्नानं न जायते । तस्मान्मनोविशुद्ध्यर्थं स्नानमादौ विधीयते । अनुद्धृतैरुद्धृतैर्वा जलैः स्नानं समाचरेत् । तीर्थं प्रकल्पयेद्विद्वान् मूलमन्त्रेण मन्त्रवित् । नमो नारायणायेति मूलमन्त्र उदाहृतः । दर्भपाणिस्तु विधिना आचान्तः प्रयतः शुचिः । चतुर्हस्तसमायुक्तं चतुरस्रं समन्ततः । प्रकल्प्यावाहयेद्गङ्गां एभिर्मन्त्रैर्विचक्षणः" । काशीख० अन्यप्रकारो दर्शितो यथा

"प्रातःस्नानं चरित्वाथ शुद्ध्येत् तीर्थे विशेषतः । प्रातःस्नानाद् यतः शुद्ध्येत् कायोऽयं मलिनः सदा । छिद्रितो नवभिश्छिद्रैः स्रवत्येव दिवानिशम् । उत्साहमेधासौभाग्यरूपसम्पत्प्रवर्त्तकम् । मनःप्रसन्नताहेतुः प्रातःस्नानं विशिष्यते । प्रस्वेदलालाद्याक्लिन्नो निद्राधीनो यतो नरः । प्रातःस्नानात्ततोऽर्हः स्यान्मन्त्रस्तोत्रजपादिषु । प्रातः प्रातस्तु यः स्नानं सञ्जाते चारुणोदये । प्राजापत्यसमं प्राहुस्तन्महाघविघातकृत् । प्रातःस्नानं हरेत् पापमलक्ष्मीं ग्लानिमेव च । अशुचित्वञ्च दुःस्वप्नं तुष्टिं पुष्टिं प्रयच्छति । नोपसर्पन्ति वै दुष्टाः प्रातःस्नायिजनं क्वचित् । दृष्टादृष्टफलं तस्मात् प्रातः-